नं. ४८०६

नाम - गुरुकवचस्तोत्रम्

कर्त्ता ×

पत्र - ४ पत्राणि सं. ×

विषयः - तन्त्रम्

गुरुकवचम्

४८०६

५०४६ / ५ पूर्ण



श्रीगणेशायनमः श्रीदेव्युवाच देवेशपरमेशानभक्तानुग्रहकारक कुलध
र्मरतावीरास्तेषांसिद्धिःस्वकारणं १ ब्रूहिमेकृपयाशंभोतवप्रीत्याममोपरि
साधकानांहितार्थायभुक्तिमुक्तिप्रदायकं २ ईश्वरउवाच शृणुदेवि
प्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् लोकोपकारकंप्रश्नंतवप्रीत्यावदामि
ते ३ अद्यप्रभृतिकस्यापिनाख्यातंकवचंमया देशिकाबहवःसंतिमं
त्राराधनतत्पराः ४ नतेषांजायतेसिद्धिर्मंत्रैर्वाचक्रपूजनैः गुरोर्वि
धानंकवचंमज्ञात्वाक्रियतेजपं ५ वृथाश्रमोभवेत्तस्यनसिद्धिर्मंत्रपूजनैः

सि १

गुरोः पादौ नमस्कृत्य प्राप्यते कवचं शुभं ६ तद्वा मंत्रस्य यंत्रस्य सिद्धि
र्भवति नान्यथा गुरोर्यच्चैव वक्तव्यं नव क्तव्यं वरानने ७ ॐ अ
स्य श्रीगुरुकवच महामंत्रस्य परमशिव ऋषिः सर्ववेत्तारोगतश्छंदः
ॐ श्री शिवादिगुरवो देवताः ह्सौः बीजं ह्सः शक्तिः हसरक्ष मंत्र
वरयूं कीलकं मम सकलसंकल्प सिद्ध्यर्थे श्रीसद्गुरुकवच महामंत्रज
पे विनियोगः अथ न्यासः ॐ ह्रां अंगुष्ठाभ्यां नमः ॐ ह्रीं तर्जना
भ्यां नमः ॐ ह्रूं मध्यमाभ्यां नमः ॐ ह्रैं अनामिकाभ्यां नमः ॐ ह्रौं

कनिष्ठिकाभ्यां नमः ॐ ह्रः करतलकरपृष्ठाभ्यां नमः इतिकर
न्यासः ॐ ह्रां हृदयाय नमः ॐ ह्रीं शिरसे स्वाहा ॐ ह्रूं शिखा
यै वषट् ॐ ह्रैं कवचाय हुं ॐ ह्रौं नेत्रत्रयाय वौषट् ॐ ह्रः अस्त्रा
य फट् इति षडंगन्यासः अथ ध्यानं स्वगुरुमंत्रइष्टदेवतानामपू
र्वकं च ध्यायेत् श्रीदिव्यौघसिद्धौघमानवौघगुरुमूर्तिं संसारदुः
खशमनं हृदि पंकजे हृदि नेत्रं वामांकशक्तिसकलाभरणैर्विभूषं ध्यायेज्जपे
त्सकलसिद्धिवरप्रदं च एवं ध्यात्वा जपेत् ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ ऐं ह्रीं

[margin, left: मंत्र ... २] [margin, right: पे २]

श्रीं लं पृथिव्यात्मने परमात्मने गंध तन्मात्र प्रकृत्यानंदात्मने श्री गुरवे पृ
थिव्यात्मकं गंधं समर्पयामि नमः ॐ ऐं ह्रीं श्रीं हं आकाशात्मने परमात्म
ने शब्द तन्मात्र प्रकृत्यानंदात्मने श्री गुरवे आकाशात्मकं पुष्पं समर्प
यं ४ यामि नमः २ ॐ ऐं ह्रीं श्रीं वाय्वात्मने परमात्मने स्पर्श तन्मात्र प्रकृत्या
नंदात्मने श्री गुरवे वाय्वात्मकं धूपं समर्पयामि नमः ३ ॐ ऐं ह्रीं श्रीं
रं तेजसात्मने परमात्मने रूपतन्मात्र प्रकृत्यानंदात्मने श्री गुरवे
तेजसात्मकं दीपं समर्पयामि नमः ४ ॐ ऐं ह्रीं श्रीं वं आपात्मने परमा
त्मने रसतन्मात्र प्रकृत्यानंदात्मने श्री गुरवे आपात्मकं नैवेद्यं समर्पया
मि नमः ५ ॐ ऐं ह्रीं श्रीं सं शक्त्यात्मने परमात्मने श्री गुरवे तांबूलं सवी

स्तवच
३

त्मकं समर्पयामि नमः ६ ॐ श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भै
रवं सिद्धौघं वटुकत्रयं पदयुगं दूतिक्रमं शांभवं वीरेशाष्टचतुःषष्टि
नवकं वीरावली पंचकं श्रीमन्मालिनिमंत्रराजसहितं वन्दे गुरोर्मण्डलं
ॐ प्रकाशानन्दनाथस्य शिरवायां पातु मे सदा परशिवानन्दनाथः शिरो
मे रक्षयेत्सदा १ परशक्त्यानन्दनाथो भाले रक्षतु सर्वदा । कौलेश्वरा
नन्दनाथो नेत्रे मे पातु सर्वदा २ शुक्लेश्वरानन्दनाथः श्रोत्रे रक्षतु मे सदा
कुलेश्वरानन्दनाथो नासिकायां च रक्षतु ३ कामेश्वरानन्दनाथो मुरवं पा
तु सर्वतः दिव्यौघसप्तकं देवी पातु सर्वं शिरस्तथा ४ कंदर्पादिनाभिप
यीतं सिद्धौघाणुरवः प्रिये श्रीभोगानन्दनाथस्य रक्षेत्कर्णं वाहुकं ५

से ३

कि क्लिन्नानंदनाथश्च रक्षयेद्वामबाहुकं समयानंदनाथश्च स्तनौ मे हृद र
येत्तु ६ सहजानंदनाथश्च कटिं नाभिं च रक्षतु श्मशाने गुदलिङ्गौ घोर
ज्ञेतु सर्वसंधिषु ७ आधारे पातु मां नौघा गुरवः ऊलनाथकं गगनानंदना
थश्च रक्षेन्मे लिंगमंडलं ८ विश्वेशानंदनाथश्च ममगुह्यं च रक्षतु विम
लानंदनाथश्च ह्यूरू रक्षयेत्सदा ९ मदनानंदनाथश्च जंघयोः पातु मे
सदा भुवनानंदनाथश्च गुल्फयोः पातु मे सदा १० लीलानंदनाथगुरु
रक्षयेत्पादपृष्ठतः स्वात्मानंदनाथगुरुः पादांगुलीश्च रक्षयेत ११ कल्लोला
नंदनाथश्च रक्षेत्पादतले सदा इत्येवं गुरुकवचं तरोनाभ्यासि पारयोः १२
गुरु रक्षेत्पृथिव्यां च सलिले परमो गुरुः परात्परतरः स्वात्मा पातु मां परमेश्वरः १३

परमेष्ठिगुरुश्चैव रक्षयेद्वायुमंडले शिवादिगुरवः साक्षादाकाशे रक्षयेत्स
दा १४ इंद्रो गुरुः पातु पूर्वस्यामग्नेय्यां गुरवोऽव्ययः याम्यां यमो गुरुः पातु नै
र्ऋत्यां निर्ऋतिर्गुरुः १५ वरुणो गुरुः पश्चिमायां वायव्यां मारुतो गुरुः
उत्तरे गुरु धनदो ईशान्यां मीश्वरो गुरुः १६ ऊर्ध्वं पातु गुरुर्ब्रह्मा अनंतो
गुरुरव्ययः सर्वमिंद्रादयो रक्षेत्कुर्वंतु गुरवः सदा १७ सर्वत्र गुरुरूपं च द्र
श्यते साधकोत्तमः स्वात्मानं गुरुरूपं च ध्यायेन्मंत्र विशेद्बुधः १८ इत्येवं
गुरुकवचं बृस्नलोकेपि दुर्लभं तव प्रीत्या मयाख्यातं न वाच्यं यत्र कुत्रचित
१९ पूजाकाले पठेद्यस्तु जपकाले विशेषतः त्रैलोक्यदुर्लभं देवि भुक्ति
मुक्तिफलप्रदं २० सर्वमंत्रफलं तस्य सर्वयंत्रफलं लभेत सर्वतीर्थफ

लेद्देवि पठयेत्कवचं गुरोः २१ अष्टगंधेन भूर्जे च लिखितं मंत्रसंयुतं
कवचं गुरुदेवस्य नत्वा च भौमवासरे २२ पूजयेद्धूपदीपाद्यैः गुरुरूप
ध्यानसंयुतैः तर्पयेद्गुरुमंत्रेण साधकः श्रद्धचेतसा २३ धारये
त्कवचं देवि विग्रहं भूतसंयं नहि पश्यति यस्मिन्काले च समन्ततो न च बंधना
त २४ इत्येवं गुरुकवचं परात्परतरं प्रिये योगसिद्धौघवान् मा मै
था कुमशास्त्रे थापर गुरुशिष्यगुरु संजितं नत्वा देशिकं मंत्ररूप प ५
ठितं चिंतो बुजे श्रीगुरुं ध्यात्वा श्रीरघवल्लार्कं वित्व[illegible] नपरं श्रेतेच मुक्ति
प्रदं २५ इति श्रीविश्वसारोद्धारे ईश्वरपार्वतीसंवादे श्रीगुरुकवचं स माप्तं

श्रीगनेश